# Shri Shivamahima aShTakam

# શ્રીશિવમહિમાષ્ટકમ્

## Document Information

Text title : shivamahimAShTakam

File name : shivamahimAShTakam.itx

Category : shiva, aShTaka

Location : doc_shiva

Author : shrInimbArkapIThAdhIshvara shrIrAdhAsarveshvarasharaNadevAchAryajI mahArAja

Transliterated by : Amit Sharma 28amitsharma at gmail.com

Proofread by : Amit Sharma, PSA Easwaran

Latest update : February 16, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

Shri Shivamahima aShTakam

# શ્રીશિવમહિમાષ્ટકમ્

સુરવૃન્દમુનીશ્વરવન્દ્યપદો હિમશૈલવિહારકરો રુચિરઃ ।
અનુરાગનિધિર્મણિસર્પધરો જયતીહ શિવઃ શિવરૂપધરઃ ॥ ૧॥

ભવતાપવિદગ્ધવિપત્તિહરો ભવમુક્તિકરો ભવનામધરઃ ।
ધૃતચન્દ્રશિરો વિષપાનકરો જયતીહ શિવઃ શિવરૂપધરઃ ॥ ૨॥

નિજપાર્ષદવૃન્દજયોચ્ચરિતઃ કરશૂલધરોઽભયદાનપરઃ ।
જટયા પરિભૂષિતદિવ્યતમો  જયતીહ શિવઃ શિવરૂપધરઃ ॥ ૩॥

વૃષભાઙ્ગવિરાજિત ઉલ્લસિતઃ કૃપયા નિતરામુપદેશકરઃ ।
ત્વરિતં ફલદો ગણયૂથયુતો જયતીહ શિવઃ શિવરૂપધરઃ ॥ ૪॥

અહિહારસુશોભિત આમ્રનુતો સમુપાસ્યમહેશ્વર આર્તિહરઃ ।
ધૃતવિષ્ણુપદીસુજટો મુદિતો જયતીહ શિવઃ શિવરૂપધરઃ ॥ ૫॥

વ્રજકૃષ્ણપદાબ્જપરાગરતો વ્રજકુઞ્જસખીનવરૂપધરઃ ।
વ્રજગોપસુરેશ ઉમાધિપતિર્જયતીહ શિવઃ શિવરૂપધરઃ ॥ ૬॥

યુગકેલિવિલાસમહારસિકો રસતન્ત્રપુરાણકથાચતુરઃ ।
રસશાસ્ત્રરસજ્ઞપટુર્મધુરો જયતીહ શિવઃ શિવરૂપધરઃ ॥ ૭॥

યમપાશભયાપહરોઽઘહરઃ પ્રબલોઽસ્તિ મહાપ્રબલઃ પ્રખરઃ ।
પરિપૂર્ણતમો હરિભક્તિભરો જયતીહ શિવઃ શિવરૂપધરઃ ॥ ૮॥

શિવશાન્ત્યર્થદં દિવ્યં શ્રીશિવમહિમાષ્ટકમ્ ।
રાધાસર્વેશ્વરાખ્યેન શરણાન્તેન નિર્મિતમ્ ॥

ઇતિ શ્રીનિમ્બાર્કપીઠાધીશ્વર શ્રીરાધાસર્વેશ્વરશરણદેવાચાર્યજી
મહારાજ દ્વારા રચિતં શ્રીશિવમહિમાષ્ટકં સમ્પૂર્ણમ્ ।

Encoded by Amit Sharma 28amitsharma at gmail.com
Proofread by Amit Sharma, PSA Easwaran

*Shri Shivamahima aShTakam*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*